# संस्कृतबालादर्शे पञ्चविंशः पाठः ॥२५॥

## सुबुद्धिः दुर्बुद्धिश्च

**मित्रम्** = friend, **कतिपयानि** = few, **अत्रान्तरे** = meanwhile, **अनादृत्य** = having disregarded.

**आस्तां कस्मिंश्चिदग्रहारे** (कस्मिन् चित् अग्रहारे in a certain village) **द्वौ सखायौ। तयोरेकः** (तयोः एकः one among the two) **सुबुद्धिः अन्योदुर्बुद्धिश्चासीत्** (अन्यः दुर्बुद्धिः च आसीत्)। **तौ कदाचित् सायं किञ्चिदुद्यानमगच्छतां** (किंचित् उद्यानम् अगच्छताम्)। **तत्र बालवृक्षेषु रुचिराणि फलान्यासन्** (फलानि आसन्)। **तानि दृष्ट्वा दुर्बुद्धिरवदत्** (दुर्बुद्धिः अवदत्) **" मित्र ! कतिपयानि फलानि गृहीत्वा, गृहं नयावः " ---इति ॥**

**तदा सुबुद्धिरकथयत्** (सुबुद्धिः अकथयत् subuddhiḥ told) **" सखे ! मैवं कुरु** (मा एवं कुरु do not do like this)। **उद्यानपालः आवां दण्डयेत् " इति। तस्य वचनमनादृत्य** (तस्य वचनम् अनादृत्य having disregarded his words) **दुर्बुद्धिः पञ्चषाणि फलान्यवचित्य** (फलानि अवचित्य breaking and pulling) **सुबुद्धेः हस्तेऽर्पितवान्** (हस्ते अर्पितवान् placed in the hands) ॥

**अत्रान्तरे** (meanwhile) **तस्योद्यानस्य** (तस्य उद्यानस्य) **पालकः समेत्य** (having joined) **तावभर्त्सयत** (तौ अभर्-त्सयत threatened those two)। **भतो दुर्बुद्धिरवदत्** (दुर्बुद्धिः अवदत्) **" आर्य न मया पातितान्येतानि फलानि** (पातितानि

एतानि फलानि these fruits made are not to fall by me) । किन्तु अनेन ( by this) मम सख्या पातितानि । नाहं अपराधी (I am not the guilty one) ”--- इति ।
तच्छ्रुत्वा (तत् श्रुत्वा having herd that) उद्यानपालः सुबुद्धिमताडयत् ॥ तस्मात्
“दुर्जनै सह मैत्री न कर्तव्या ”

**क) प्रश्नाः - - -**

“ दुर्जनैः सह मैत्री न कर्तव्या ” इति एतस्याः कथायाः नीतिः ।

१. द्वौ सखायौ कुत्र आस्ताम् ?

द्वौ सखायौ कस्मिंश्चित् अग्रहारे आस्ताम् ।

२. तौ कीदृशौ ?

तयोरेकः सुबुद्धिः अन्यः दुर्बुद्धिः च बालकौ आसीत् ।

३. तौ कदचित् क्दा कुत्र आगच्छताम् ?

तौ कदाचित् सायं किञ्चिदुद्यानमगच्छताम् ।

४. कुत्र केषु रुचिराणि फलान्यासन् ?

तस्मिन् उद्याने बालवृक्षेषु रुचिराणि फलान्यासन् ।

५. तानि दृष्ट्वा दुर्बुद्धिः किमवदत् ?

तानि फलानि दृष्ट्वा दुर्बुद्धिरवदत् “मित्र ! कतिपयानि फलानि गृहीत्वा गृहं नयावः ” इति ।

६. तदा सुबुद्धिः किमकथयत् ?

तदा सुबुद्धिः " मैवं (मा एवं) कुरु। उद्यानपालः आवां दण्डयेत्" इति अकथयत्।

७. तस्य वचनमादृत्य दुर्बुद्धिः किमकरोत् ?

तस्य वचनमनादृत्य दुर्बुद्धिः पञ्चषाणिफलान्यवचित्य सुबुद्धेः हस्तेऽर्पितवान्।

८. अत्रान्तरे कः तावभर्त्सयत (तौ अभर्त्सयत) ?

अत्रान्तरे तस्य उद्यानस्य पालकः समेत्य तौ सखायौ अभर्त्सयत।

९. भीतो दुर्बुद्धिः किमवदत् ?

भीतः दुर्बुद्धिः वनपालकं अवदत् " न मया पतितानि एतानि फलानि। किन्तु अनेन मम सख्या पतितानि। न अहं अपराधी " इति।

१०. तच्छ्रुत्वा (तत् श्रुत्वा) उद्यानपालः किमकरोत् ?

तच्छ्रुत्वा (तत् श्रुत्वा) उद्यानपालः सुबुद्धिमताडयत्।

११. कैः सह मैत्री न कर्तव्या ? कुतः ?

दुर्जनैः सह मैत्री न कर्तव्या। दुर्जनैः सह मैत्री वयं कष्टावस्थिते भविष्यामः।

ख) " आहत्य , इति, अतीव , एवम् " एतैः यथायोगं वाक्यानि पूरयत - - -

१. **अद्य** उपध्यायः **नागच्छति** ____ **रामः अवदत्।**

**अद्य** उपध्यायः **नागच्छति** **इति** **रामः** अवदत्।

२. अस्यां सखायाम् ____ अष्ट फलानि विद्यन्ते।

अस्यां सखायाम् आहत्य अष्ट फलानि विद्यन्ते।

३. ____ मे माता मामकथयत्।

एवं मे माता मामकथयत्।

४. इदं कुसुमम् ____ मनोहरं वर्तते।

इदं कुसुमम् अतीव मनोहरं वर्तते।

ग) उचितैः क्रियारूपैः वाक्यानि पूरयत - - -

१. केचित् बालाः ह्यः पाठं न ____ (पठ्)

केचित् बालाः ह्यः पाठं न अपठन्।

२. अहं श्वः पाठालयं न ____ (गम्)

अहं श्वः पाठालयं न गमिष्यामि।

३. सन्तो बालाः यथाकालं स्वीयानि कर्माणि ____ (कृ)

सन्तो बालाः यथाकालं स्वीयानि कर्माणि कुर्वन्ति।

४. ह्यः सूर्यः मेघैः आवृतः न - - -(प्रकाश्)

ह्यः सूर्यः मेघैः आवृतः न अप्रकाशयत्।

घ) ‘ रभ् ’ धातोः (आत्मनेपदी) विधिलिङ् रूपाणि - - -

| | | | | | | |
|---|---|---|---|---|---|---|
| **प.पु.** | रभेत | रभेयातां | रभेरन् | ईत | ईयातां | ईरन् |
| **म.पु.** | रभेथाः | रभेयाथां | रभेध्वं | ईथाः | ईयाथाम् | ईध्वम् |
| **उ.पु.** | रभेय | रभेवहि | रभेमहि | ईय | ईवहि | ईमहि |

ङ) पठत - - १) च + आसीत् = चासीत् २) न + अदुम् = नादुम्

च) **संख्याशब्दाः** - - -

१० दश , २० विंशतिः , ३० त्रिंशत् , ४० चत्वारिंशत् ,
५० पञ्चाशत् , ६० षष्टिः, ७० सप्ततिः , ८० अशीतिः , ९० नवतिः ,
१०० शतम् , १, ००० सहस्रम् , १०,००० अयुतम् , १००,००० लक्षम् ,
१,०००,००० प्रयुतम् , १०,०००,००० कोटिः

**शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary**

मित्रम् *n* a friend

कतिपय ***a.n.*** a few

अत्रान्तरे ***in*** meanwhile

अनादृत्य ***in*** having disregarded

कदाचित् ***in*** once

बालवृक्षः *m* young tree

उद्यानपालः *m* gardener

पञ्चषाणि ***a.n.*** five or six

आर्य ***m*** Sir

मैत्री ***f*** friendship